"हरीतकी पञ्चरसा च रेचनी
कोष्ठामयघ्नी लवणेन वर्ज्जिता ।
रसायनी नेत्ररुजापहारिणी
त्वगामयघ्नी किल योगवाहिनी ॥"

अन्यच्च ।

"वीजास्थितिक्तं मधुरा तदन्त-
स्त्वग्भागतः सा कटुरुष्णवीर्य्या ।
मांसांशतश्चाम्लकषाययुक्ता
हरीतकी पञ्चरसा स्मृतेयम् ॥

पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरुः ॥"

तस्या भेदा यथा,—

"हरीतक्यस्ततोत्पन्ना सप्तभेदैरुदीरिता ।
तस्या नामानि वर्णांश्च वक्ष्याम्यथ यथाक्रमात् ॥
विजया रोहिणी चैव पूतना चामृताभया ।
जीवन्ती चेतकी चेति नाम्ना सप्तविधा स्मृता ॥
अलावुवृत्ता विजया सुवृत्ता रोहिणी मता ।
स्वल्पत्वक् पूतना ज्ञेया स्थूलमांसामृता स्मृता ॥
पञ्चास्रा चाभया ज्ञेया जीवन्ती स्वर्णवर्णभाक् ।
त्र्यस्रा तु चेतकी विद्यादित्यासां रूपलक्षणम् ॥
विन्ध्याद्रौ विजया हिमाचलभवा स्याच्चेतकी पूतना
सिन्धौ स्यादथ रोहिणी तु विजया जाता प्रतिष्ठानके ।
चम्पायामभृताभया च जनिता देशे सुराष्ट्राह्वये
जीवन्तीति हरीतकी निगदिता सा सप्तभेदा बुधैः ॥ * ॥

सर्व्वप्रयोगे विजयाथ रोहिणी
क्षतेषु लेपेषु च पूतनोदिता ।
विरेचने स्यादमृता गुणाधिका
जीवन्तिका स्यादिह जीर्णरोगजित् ॥
स्याच्चेतकी सर्व्वरुजापहारिका
नेत्रामयघ्नीमभयां वदन्ति ताम् ।
इत्थं यथारोगमियं प्रयोजिता
ज्ञेया गुणाढ्या न कदाचिदन्यथा ॥

चेतकी च धृता हस्ते यावत्तिष्ठति देहिनः ।
तावद्विरिच्यते वेगात्तत्प्रभावान्न संशयः ॥
सप्तानामपि जातीनां प्रधानं विजया स्मृता ।
सुखप्रयोगसुलभा सर्व्वव्याधिषु शस्यते ॥
क्षिप्ताप्सु निमज्जति या सा ज्ञेया गुणवती भिषग्वरैः ।
यस्या यस्या भूयो निमज्जनं सा गुणाढ्या स्यात् ॥
हरते प्रसभं व्याधीन् भूयस्तकति यद्वपुः ।
हरीतकी तु सा प्रोक्ता तकतिर्दीप्तवाचिका ॥
हरीतकी तु तृष्णायां हनुस्तम्भे गलग्रहे ।
शोषे नवज्वरे क्षीणे गुर्व्विण्यां नैव शस्यते ।"

इति राजनिर्घण्टः ॥ * ॥

अपि च ।

"दक्षं प्रजापतिं स्वस्थं अश्विनौ वाक्यमूचतुः ।
कुतो हरीतकी जाता तस्यास्तु कति जातयः ॥
रसाः कति समाख्याताः कति चोपरसाः स्मृताः ।
नामानि कति चोक्तानि कश्च तासाञ्च लक्षणम् ॥
के च वर्णा गुणाः के च का च कुत्र प्रयुज्यते ।
केन द्रव्येण संयुक्ता कांश्च रोगान् व्यपोहति ॥
पृच्छाम्येतद्यथा पृष्टं भगवन् ! वक्तुमर्हसि ।
अश्विनोर्व्वचनं श्रुत्वा दक्षो वचनमब्रवीत् ॥
पपात बिन्दुर्म्मेदिन्यां शक्रस्य पिबतोऽमृतम् ।
ततो दिव्यात् समुत्पन्ना सप्तजातिर्हरीतकी ॥
हरीतक्यभया पथ्या कायस्था पूतनामृता ।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा ।
वयस्था विजया चापि जीवन्ती रोहिणीति च ।
विजया रोहिणी चैव पूतना चामृताभया ।
जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः ॥ * ॥
अलावुवृत्ता विजया वृत्ता सा रोहिणी स्मृता ।
पूतनास्थिमती सूक्ष्मा कथिता मांसलामृता ॥
पञ्चरेखाभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी ।
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः ॥ * ॥
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी ।
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता ॥
अक्षिरोगेऽभया शस्ता जीवन्ती सर्व्वरोगहृत् ॥
चूर्णार्थे चेतकी शस्ता यथा युक्तं प्रयोजयेत् ॥ * ॥
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः ।
षडङ्गुलायता शुक्ला कृष्णा चैकाङ्गुलायता ॥
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत् ।
काचित् स्पर्शेन दृष्टान्या चतुर्द्धा भेदयेच्छिवा ।
चेतकीपादपच्छायामुपसर्पन्ति ये नराः ।
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः ॥
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः ।
तावद्भिद्येत वेगैस्तु प्रभावान्नात्र संशयः ॥
नृपादिसुकुमाराणां कृशानां भेषजद्विषाम् ।
चेतकी परमा शस्ता हिता सुखविरेचनी ॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता ।
सुखप्रयोगा सुलभा सर्व्वरोगेषु शस्यते ॥
हरीतकी पञ्चरसालवणा तुवरा परम् ।
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ।
चक्षुष्या लघुरायुष्या बृंहणी चानुलोमिनी ।
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन् ॥
वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान् ॥
गुल्माध्मानव्रणच्छर्द्दिहिक्काकण्डूहृदामयान् ॥
व्रणस्थाने तृषा इति क्वचित् पुस्तके पाठः ।
कामलां शूलमानाहं प्लीहानञ्च यकृत्तथा ।
अश्मरीमूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत् ॥
स्वादुतिक्तकषायत्वात् पित्तहृत् कफहृत्तु सा ।
कटुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा ॥
पित्तकृत् कटुकाम्लत्वात् वातहृन्न कथं शिवा ।
प्रभावाद्दोषहन्तृत्वं सिद्धं यत्तत् प्रकाश्यते ॥
हेतुभिः शिष्यबोधार्थं न पूर्व्वं क्रियतेऽधुना ।
कर्म्मान्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः ।
यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा ॥
पथ्याया मज्जनि स्वादुः स्नायावम्लो व्यवस्थितः ।
वृन्ते तिक्तस्त्वचि कटुरस्थिस्थस्तुवरो रसः ॥ * ॥
नवा स्निग्धा घना वृत्ता गुर्व्वी क्षिप्ता च याम्भसि ।
निमज्जेत् सा सुप्रशस्ता कथितातिगुणप्रदा ॥
नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता ।
हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते ॥
चर्व्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी ।
स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत् ॥

उन्मीलिनी बुद्धिबलेन्द्रियाणां
निर्म्मूलिनी पित्तकफानिलानाम् ।
विस्रंसिनी मूत्रशकृन्मलानां
हरीतकी स्यात् सह भोजनेन ॥

अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान् ।
हरीतकी हरत्याशु भुक्तस्योपरियोजिता ॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा ।
घृतेन वातजान् रोगान् सर्व्वरोगान् गुड़ान्विता ।
सिन्धूत्थशर्कराशुण्ठीकणामधुगुड़ैः क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥

अध्वातिखिन्नो बलवर्जितश्च
रूक्षः कृशो लङ्घनकर्षितश्च ।
पित्ताधिको गर्भवती च नारी
विमुक्तरक्तस्त्वभयां न खादेत् ॥"

इति भावप्रकाशः ॥ * ॥

अन्यच्च ।

"जीवन्ती रोहिणी चैव विजया चाभयामृता ।
पूतना कालिका चेति सप्तजातिर्हरीतकी ॥
सुवर्णवर्णा जीवन्ती रोहिणी कपिलद्युतिः ।
अलावुवृत्ता विजया पञ्चांशा चाभया स्मृता ॥"

पञ्चांशा पञ्चशिरा ।

"स्थूलमांसामृता ज्ञेया पूतनास्थिमती मता ।
त्र्यंशा च कालिकेत्येवं सप्तजातिर्हरीतकी ॥
स्नेहपानेषु सर्व्वेषु जीवन्ती तु प्रशस्यते ।
रोहिणी क्षतरोगेषु विजया सर्व्वकर्म्मसु ॥
पूतना लेपने ज्ञेया अमृता तु विरेचने ।
अभया नेत्ररोगेषु गन्धयुक्ता तु कालिका ॥
हरस्य भवने जाता हरिता च स्वभावतः ।
हरते सर्व्वरोगांश्च तेन नाम्ना हरीतकी ॥ * ॥
पीयूषं पिबतस्त्रिपिष्टपपतेर्ये बिन्दवो निर्गता-
स्तेभ्योऽभूदभया दिवाकरकरश्रेणीव दोषापहा ।
कालिन्दीव बलप्रमोदजननी गौरीव शूलिप्रिया
वह्निद्योतकरी हुताहुतिरिव क्षौणीव नानारसा ॥
पथ्या पञ्चरसायुष्या चक्षुष्यालवणा सरा ।
मेध्योष्णा दीपनी कुष्ठदोषशोथव्रणापहा ॥" * ॥

पञ्चरसस्य विवरणम् । त्वक् कटुः । मांसं अम्लकषायम् । अस्थि तिक्तम् । तन्मध्ये माधुर्य्यम् ॥ * ॥

तन्मज्जगुणाः ।

"पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरुः ॥"

इति राजवल्लभः ॥

**हरीषा**, स्त्री, मांसव्यञ्जनविशेषः । भाश इति हिन्दी भाषा । यथा,—

"पाकपात्रे तु बृहति मांसखण्डानि निःक्षिपेत् ।